वेदस्तुतिटीका श्रीभागवते

३६२८

॥व्या॥शंकरजीवीरजी॥पत्र१८

वेद उत्तरी
श्री [illegible]

वे.उ.
१

श्रीगणेशायनमः ॥ ॥समाधीतितमेनारायणं नारदवादतः। वेदैः स्तुतिर्गुणातंवा निर्गुणावधिवर्ण्यते ॥१॥ ॐ नमो भगवते वासुदेवाय। वागीशा यस्य
वदने लक्ष्मीर्यस्य च वक्षसि। यस्यास्ते हृदये संवित्तं नृसिंहमहं भजे ॥२॥ संप्रदायविशुद्धार्थं स्वीयनिर्बंधयंत्रितः। श्रुतिस्तुतिमितव्याख्यां करिष्यामि
यथामति ॥३॥ श्रीमद्भागवतं पूर्वैः सारतः सन्निषेवितं। मयातु तदुपस्पृष्टमुच्छिष्टमुपनीयते ॥४॥ पूर्वाध्याये तेष्वेवं स्वभक्त्यो राजन् भगवान् भक्त
भक्तिमान् ॥ उपदिष्टादिश्य स्वमार्गं मुनिर्हरिरदर्शनमादित्यस्मान्मार्गं सितां सतः प्रमाणभूतानाम् शामाणपकारणारहितानां वेदानां मार्गं ब्रह्मपरत्वमु
पदिश्य भगवान् मादिस्तुतं तत्र वेदानां ब्रह्मपरत्वमयस्मान्नमत्वा नः पृच्छति ब्रह्मन्निति। तत्र तावन्मुख्यलक्षणा गुणभेदेन त्रिधा शब्दवृत्तिः। मुख्या
पिरूढियोगभेदेन हि। रूढिस्वरूपेण जात्या गुणेन नामनिर्देश्यं वस्तु निर्दिशंत्येके ते न प्रवर्तंते। यथा डित्थः गौः शुक्ल इति। लक्षणा च संबंधे

श्रीपरिक्षिदुवाच ॥ ब्रह्मन् ब्रह्मण्यनिर्देश्ये निर्गुणे गुणवृत्तयः। कथं चरंति श्रुतयः साक्षात्सदसतः परे ॥१॥

वस्तुके नाभिहितार्थसंबंधिनि यथा गंगायां घोष इति। [illegible] अभिहितार्थलक्षितगुणयुक्ते तत्सदृशे यथा सिंहो देवदत्त इति। यथा ऊह। अभिधेयावि
नाभूत [illegible] तत्रिविधवृत्तिप्रतिपादितपदार्थयोः। प्रकृतिप्रत्ययार्थयोर्वा यो
गेन यथा पंकजं [illegible] निर्धर्मं भवतीत्याह [illegible] कथं चरंतीति। तत्र हेतुः। अनिर्देश्य इति। अनिर्देश्यत्वेपि हेतुं च
दन्गुणवृत्ति निराकरोति [illegible] निर्गुणे कथं वर्तंतां [illegible]। निर्गुणत्वे च हेतुं वदन् लक्षणां योगं च निराकरोति। सदस
तः पर इति। का [illegible] संबंधाभावान्न लक्षणा योगवृत्तिः संभवत इत्यर्थः ॥ एवं पदार्थत्वा [illegible] योगाद्पदार्थस्य च वाक्या
र्थत्वायोगान्न श्रुतिगोचर [illegible] लक्षणाद्युपाभिप्राय: १ ॥ ॥श्रीगोपीजनवल्लभायनमः ॥ ॥ ॥ दू ॥ ॥ ॥ दू ॥ ॥ दू ॥ ॥

[illegible] पाधीन् जनानामनुशायिनां । जीवानां मात्राद्यर्थप्रभुरीश्वरोऽसृजत । भीयन्त इति मात्राः । विषयास्तदर्थं भवार्थं भ
उत्तरमाह बुद्धीन्द्रियेति । बुद्ध्या [illegible] मित्यर्थः । आत्मने लोकान्तरगामिने आत्मनस्तत्र लोकभोगायेत्यर्थः । अकल्पनायेत्यनेनानिवृत्तये मुक्त
दोजन्मलक्षणं कर्तृत्वप्रभृतिकम [illegible] णार्थमित्यर्थः [illegible] स्पष्टार्थः । जनानामिति वदन् जीवार्थमीश्वरस्य सृष्ट्यादिषु प्रवृत्तिरिति दर्शयति । प्रभुरीश्व
य इत्यर्थः । अर्थधर्मकाममोक्षार्थमिति क [illegible] दर्शयति । अथ [illegible] प्रायः । सगुणमेव गुणैरनभिभूतं सर्वज्ञं सर्वशक्तिं सर्वेश्वरं सर्वनियन्तारं सर्वोपास्यं सर्वक
रस्य उपाधिवशपता भावेन नियामक [illegible] ल्याणगुणानिलयं सच्चिदानन्दं भगवन्तं श्रुतयः प्रतिपादयन्ति । यः सर्वज्ञः सर्ववित् । यस्य ज्ञानमयं तपः । सर्वस्य वशी सर्वस्य
र्मफलप्र [illegible] पृथिव्यां तिष्ठन् पृथिव्या अन्तरः । सोऽकामयत बहु स्यां स ऐक्षत । तत्तेजोऽसृजत सत्यं ज्ञानमनन्तं ब्रह्मेत्याद्याः । तथाभूतेश्वरतां तावत्संसारिणो
[illegible] वस्य तन्निवृत्तये तत्त्वमसीत्यादिवाक्यानि बोधयन्ति । तत्र च तत्त्वंपदयोः सामानाधिकरण्यं प्रतीयते । तच्च प्रकारान्तरेणाघटमानं ब्रह्मणि पर्यव

—— शुक उवाच ॥ ॥ बुद्धीन्द्रियमनःप्राणान् जनानामसृजत्प्रभुः । मात्रार्थं च भवार्थं च आत्मनेऽकल्पनाय च २

सानं गमयति । तथाहि । न तावद्वैश्वदेव्यामिक्षेतिवदुभयोरेकार्थाभिधानेन सामानाधिकरण्यं । यथोक्तं । आमिक्षां देवतायुक्तां वदन्त्येवैष तद्धितः । आमिक्षा
पदसान्निध्यात्तस्यैव विषयार्पणमिति । कुतः भिन्नार्थत्वात् । न चाऽजहत्स्वार्थयोर्निरूढलक्षणया विशेषणविशेष्यभावेन नीलमुत्पलमितिवत् । यथो
क्तं । स्वबुद्ध्या रज्यते येन विशेष्यं तद्विशेषणमित्यादि । कुतः विरुद्धार्थत्वेन तदयोगात् । न च जहत्स्वार्थत्वेन संबंधिलक्षणया कुसुमितद्रुमा गंगेतिवत् । कु
तः एकार्थत्वस्य विवक्षितत्वात् । अतो जहदजहत्स्वार्थलक्षणया सोऽयं देवदत्त इतिवद्विरुद्धांशत्यागेनानुगतचिदंशेनैकार्थ्येन सामानाधिकरण्येन निर्गु
णे पर्यवसानं । अस्थूलादिवाक्यानां तु साक्षादुपाधिनिषेधेन । तथा चात्रैवोपक्रमे स्वसृष्टमिदमापीयेत्यादिना विशिष्टमालंबनं वक्ष्यति । अन्ते च श्रुतयस्त्व
विहितफलं त्वत्तन्निरसनेन भवन्निधना इति उपसंहरिष्यति । उपासनादिवाक्यानां क्रियार्थप्रवृत्तत्वस्य स्पष्टत्वादवलंबेन ज्ञानसाधनविधाने न तत्परत्वमिति सेवादिकं ॥२॥

५.३

अन्नचाला [illegible] वान्नसंदेहो मुक्त इत्याह सैषेति सैषायद्योका [illegible] वणाब्राह्मीब्रह्मपर [illegible]

२ अवणादिनाभासैत [illegible] किंचनः निरस्तदेहा ह्यपा [illegible] मनूप [illegible] दिति॥ ३॥ तदेव सर्वं [illegible] रोऽवेदं [illegible] र्कानिमित्ति [illegible]

रयति [illegible] तइति। नारायणान्विताना रायणः प्रव [illegible] लेनान्विता यस्यांतां गाथामितिहासं॥ ४॥ ८॥ [illegible] पंचविंशति [illegible]

गादिरूपे [illegible] कुर्हतितत्कर्मसत्त्वेप सिद्धं। तथायत्र समाना एवब [illegible] श्रोतभावेन तत्र समीमांसतेतत्वब्रह्मसत्रं॥ ९॥ अहो तर्हि मिथ्या कथं न ज्ञा

सैषात्मकपनिषद्ब्राह्मीपूर्वेषांपूर्वजैर्धृता। श्रद्धयाधारयेद्यस्तांसे मं गच्छेदकिंचनः॥ ३॥ अत्रोवर्णयिष्य [illegible] थां नारायणान्वितां। नार

स्य च संवादं नृषेर्नारायणस्य च॥ ४॥ एकदा नारदो लोकानूपर्यटन् भगवा [illegible] वैभारतवर्षेऽस्मिन्क्षेमाय स्वस्तये नृणां। धर्मज्ञानशमोपेतमाकल्पादास्थितस्तपः॥ ६॥ तत्रोपविष्टमृषिभि [illegible] नारायणमभ्यम॥ ५॥ ये

। परीतं प्रणतोऽपृच्छदिदमेव कुरूद्वह॥ ७॥ तस्मोऽह्य वोच द्भगवानृषीणांशृण्वतामिदं। योब्रह्मवादः पूर्वेषांजनलोके [illegible]

२ श्रीभगवानुवाच॥ ॥स्वायंभुवब्रह्मसत्रं जनलोके [illegible]॥ तत्रस्थानां मानसानां मुनीनामूर्ध्वरेतसां॥ ९॥ श्वेतद्वीपं गतवति त्वयि

[illegible] वादः समभूत्। श्रुतयो यत्र शेरते [illegible] द्यं पां गमन्न प्रष्टसि॥ १०॥ तुल्य [illegible] तपः शीला [illegible] स्वीया

रिमध्यमाः॥ अपि च [illegible] मेकं [illegible] परे॥ ११॥ श्रीसनंदनउवाच॥ स्वसृष्टमिदमापीय शयानं सहशक्तिभिः। तदंते बोधयां

चक्रुस्तल्लिंगैः श्रुतयः [illegible] शयानं सम्राजं वंदिनस्तत्पराक्रमैः। प्रत्यूषेऽभेत्य सुश्लोकैर्बोधयंत्यनुजीविनः॥ १२॥

नमित [illegible] नदी [illegible] व रंतत्र स्थं मामेवानिरूद्धमूर्ति॥ ९॥ ननु सर्वज्ञास्ति कस्तत्र वक्ता प्रष्टा वा तत्राह। तल्पश्रुतेति [illegible] दिभिरवि [illegible]

[illegible] निरूपमकरूणा [illegible] सर्वे श्ववच नयो [illegible] पिको तु के ने कं प्रकारं ज्ञत्ला नोपपद्य रित्यर्थः॥ १॥ स्वस्त [illegible] रम

[illegible] ममतयः [illegible] ववदमानो तद [illegible] तातत्त्विरे [illegible] नित्यास्ते [illegible] २

[illegible] प्रतु [illegible] यथश्नैः [illegible] ॥ १३

जय जयेति। भोऽजित जय जय उत्कर्षं माविःकुरु। आविष्कुरु केन व्यापारेण। अगजगदोकसां अगानि स्थावराणि जगंति जंगमानि सर्वेषु कोशिशरीराणि येषां जीवानां तेषामजाम विद्यां जहि नाशय किमिति गुणवतीं हंतव्येत्यत आह। दोषगृभीतगुणां दोषाय आनंदाद्यावरणाय गृहीता गुणाय शक्तिः स्यात् अत आह। त्वमिति। यत् यस्मात् त्वं आत्मना स्वरूपेणैव समवरुद्धसमस्तभगः संप्राप्तसमस्तैश्वर्योसि। वशीकृतमायत्वादिति भावः। नन्वस्त्वयमेव तेज्ञानं वै राग्यादिना किंन हस्तु रित्यत आह। अखिलशक्त्यवबोधकेति। तेषां त्वमेवांतर्यामी सर्वशक्त्युद्बोधकः। अतो न ते ज्ञानादौ स्वतंत्रा इति।

श्रुतय ऊचुः॥ ॥जय जय जह्यजामजित दोषगृभीतगुणां त्वमसि यदात्मना समवरुद्धसमस्तभगः। अगजगदोकसाम
खिलशक्त्यवबोधक ते क्वचिदजयात्मना च चरतोऽनुचरेन्निगमः १४

भावः। अहमकुंठ ज्ञानैश्वर्यादिगुणो जीवानां कर्मज्ञानादि शक्त्यवबोधनेनाऽविद्याहंतेत्यत्र किं प्रमाणमिति चेत् अहमेव प्रमाणम् इत्याह निगमः वेदः। ननु एवंभूते मयि कथं श्रुतीनां प्रवृत्तिः तत्राह क्वचिदिति। कदाचित् सृष्ट्यादिसमये अजया मायया चरतः क्रीडतः नित्यं चात्मस्वभावतया स्वरूपज्ञाना नंदैकरसेनात्मना चरतो वर्तमानस्य निगमोऽनुचरेत् प्रतिपादयेत्। कर्मणि षष्ठी। यतो वा इमानि भूतानि जायंते। यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये। यश्चात्मनि तिष्ठन्। सत्यं ज्ञानमनंतं ब्रह्म। यः सर्वज्ञः सर्ववि दित्याद्यागमकदंबस्त्वामेवंभूतं प्रतिपादयतीत्यर्थः। जय जया जित जह्यगाजगमा कृतिमजामुपनीतमृषागुणां नहि भवंतमृते प्रभवंत्यमी निगम
गीतगुणार्णवतानव १४॥१

द·उ नन्वेवमप्येवमात्मानमेव प्रतिपादयन्तीति यत्त्वं स्वयमेवाऽवसितस्त्वं राजेन्द्र शिशिरं कृत्वा तोऽगमस्य चावसितस्य स्थावरस्य चराजेति प्रतिपाद्यते। तथा भूमि
२ मूर्द्धा दिवश्च त्वाश्रिशिरोऽयं भूतत्वेनात्मा वेदयः प्रतिपाद्यं तेत्याह दृहदुपलब्धमेतदिति। [illegible] एतदुपलब्धं दृष्टमिदमादि सर्वं दृहत्त्वं सत्त्व
मित्येवावयं विज्ञानेति। कथं दृहत्त्वं स्वतो विशेषतया विशिष्यमाणत्वेन। कुतः यतो दृहतः सर्वस्योदयास्तमययोरुत्पत्तिलययोः सर्वोपादानत्वात्तत
3 हि चित्तं दृहतः। नाप्यविकृतात्त विवर्त्ताधिष्ठानत्वेनाविकारादित्यर्थः। वाशब्द उपमार्थः। यथा घटादेर्विकृते मृदादिरुदयास्तमयोरविकृत।
वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यं। सर्वं खल्विदं ब्रह्मेत्यादिश्रुतिस्तथा प्रतिपादनादित्यर्थः। अतः कारणमेव दृष्टं यो मंत्रास्तद्द्रष्टारो वा

दृहदुपलब्धमेतदवयं त्वविशेषतया यतउदयास्तमयौ विकृतेर्मृदिवाऽविकृतात्। अतश्च योः स्वयुग्म
ये मनो वचनाचरितं कथमयथाभवं ति श्रुतिरत्तपदानि ऋणाम्॥१५॥ ॥नृ॥ ॥नृ॥ ॥

त्वय्येवमनो वचनाचरितं दृश्यमनस्याचरितं तात्पर्यं वचनाचरितमभिधानं संवृत्तवंतः। न पृथग्विकारेष्विति त्यर्थः। अत्र निदर्शनं कथमयथेति नृ
पाणां भूतराणां यत्र कृत्वापि दत्तानि निक्षिप्तानि पदानि भुवि कथमयथा भवंति अदत्तानि भवंति अतो यथा मृत्पाषाणेष्टकादिषु दत्तानि पदानि राम
भुवि दत्तानि पदानि तथा ये केऽपि विकारजातं वदंतो वेदास्त्वामेव सर्वकारणं परमार्थभूतं प्रतिपादयन्तीत्यर्थः। [illegible] हिरण्यवह्निरवींद्रमुखामरगज ३
गदितेंद्रं भवे भृत्युग्रहिंसिंहे [illegible] वरौरजस्त्वखुरुमूर्त्तिस्ते शिशिरगिरौ॥१५॥ ॥

त्वमेव सर्वनिगमगोचर इति स्तोतुं [illegible] हृदयंति। इति तवेति त्वमेव सर्वकारणत्वेन परमार्थ इति कृत्वा त्र्यधिपते [illegible] नर्तकी
रयो विवेकिनस्तवाखिललोकमलक्षपणकथामृताब्धिं सकलजनवृजिननिरसन हे त्वत्कीर्तिसुधासिंधुमवगाह्य [illegible] तपांसि पापा-
नि दुःखानि विधातानि जहुः त्यक्तवंतः। त्वदीयकथामात्रेणायद्यपापत्यागः तदा किमु वक्तव्यं ये पुनः स्वधामविधुताशयकालगुणाः स्वधाम्ना स्व-
रूपस्फुरणेन विधुताः त्यक्ता आशयगुणा अंतःकरणधर्मा रागादयः कालगुणाजरादयश्च यैस्ते तथा हे परम [illegible] अखंडानंद-

इति तव सूरयस्त्र्यधिपतेऽखिललोकमलक्षपणकथामृताब्धिमवगाह्य तपांसि जहुः। किमुत
पुनः स्वधामविधुताशयकालगुणाः परम भजंति ये पदमजस्रसुखानुभवम् १६

सुखानुभवं पदं स्वरूपं भजंति सेवंते तथाभूता दुःखानि त्यजंतीति। तद्यथा पुष्करपलाशमापो न श्लिष्यंते एवमेवैवंविदि पापं कर्म न श्लिष्यते। न कर्मणा
लिप्यते पापकेन तत्स्वरूपं [illegible] विधुनुते। एतं ह वाव न तपति किमहं साधु नाकरवं किमहं पापमकरवमित्यादिश्रुतेरित्यर्थः। सकलवेदगणेरित-
सद्गुणस्त्वमिति [illegible] जना रताः। त्वयि शुभद्गुणश्रवणादि [illegible] स्तवपदस्मरणेन नतक्रमाः॥ १६ ॥ २

ब्र॰ ४

...मानते लोकास्तेन तमसावृताः। तांस्ते प्रेत्याभिगच्छंति ये के चात्महनो जनाः। यथा ... वेदीदिनश्रीरित्याद्याः श्रुतयः पूर्वश्लोको भय
विभजनहीनाविंदतीति हतय इवेति। अमुं भूतोनरः यदिति अनुविद्य अनुविदितः सत्तु विधाः अनुवर्तिनो भक्ता इतियावत्तर्हि स्वमंलिजी
वे तिसफलजीवनाभवे ... यथा हतय इव भस्त्रा इव हथा स्वासा उत्पर्थः। नन्वभक्तानामपि कामादिफलमस्त्येव नकार्यकारणानुग्राहक...
...तो सत्तान्न ने ... नांतदपि न सिध्येदित्याशयेनाह। महदहमाद्य इति। महानहंकारश्च आदिर्येषां तेयदनुग्रहतः यस्मात्तु प्रवेशेन
...सामर्थ्या... देहं समहित्य हि रूपं सम्भवंतः। अत्र च पंचापि कोशा अन्नमयादीनां ... तन्नदाकारः सन्नयः चेतयते सलंतदाह पुरुषविध

इतयश्च श्वसंतं ... यो परि ते त्तु विधामहदहमाद्यो ... अनुग्रहतः ... पुरुषविधोन्वयोत्र चरमो
न्नमयादिषु यः सदसतः परं त्वमप्ययदेष्ववशेष मृतम् ॥ १० ॥ ॥ठ॥ ॥

इति पुरुषस्यान्नमयादेर्विविधा ... विधा आकारो यस्य स तथा न तु विदेक ... तस्य कथं तन्नदाकारता अत आह। अन्वयो वेति। अत्र एष्वन्नमयादिष
न्वेतीत्यन्वयः अतस्तन्नदाकारतेति। एवं तर्हि ... सत्वमसंगत्वं च कथं तत्राह। यो न मयादिषु य इति। अन्नमयादिषूपदिश्यमानेषु यश्चरमो
पुच्छं प्रतिष्ठेति श्रुत्या ... नित्ति संबंधः ननु तथाप्यन्नमयादिष्वन्वितत्वे संगत्वमाहतिरेव तत्राह सदसतः परं त्वमप्ययदेष्ववशेष ...
...सदसतः स्थूलसूक्ष्मादन्नमयादेः परंव्यतिरिक्तं तत्साक्षिभूतं अवशेषं अवशिष्यत इत्यवशेषमवाध्यं अथ अत एव सत्तं सत्यं तर्हि किमर्थं तेष्व
न्वयस्तत्र ... चंद्रवत् ... स्वरूपलक्षणार्थं तथाहि स वा एष पुरुषोन्नरसमयस्तस्येदमेव शिर इत्यादिना स्थूल ... त्मोपादि ... नुपदिश्य
तस्य पुरुषविधतामन्वयं पुरुषविध इति पुनः पुनः तदन्वितत्वेनालक्ष्य ब्रह्म पुच्छं प्रतिष्ठेति सर्वसाक्षि शुद्धस्वरूपे निरूपणमित्यन वद्यानरवत्तुः ...

एवंतावत्सर्वात्मकेपरमेश्वरेसर्वश्रुतिसमन्वयेनसङ्गमनीयत्वमुक्तंअभक्तानिंस्याच्चतदेवदृढीकर्तुमिदानीमनवगाह्यमहिमानिप्रथमंतावदुपा
ध्यालंबनमुपासनंउदरंब्रह्मेतिशार्कराक्षाउपासते।हृदयंब्रह्मेत्यारुणयोब्रह्माहेवताईऊर्ध्वंत्वेवोदसर्पत्तच्छिरोऽश्रयतेत्याद्याःश्रुतयोवि
दधतीत्याह।उदरमुपासतइति।ऋषिवर्त्मसुऋषीणांसंप्रदायमार्गेषुयेकूर्पदृशःतेउदरालंबनंमणिपूरकस्थंब्रह्मोपासतेध्यायंति।शार्क
राक्षाइतिश्रुतिपदस्यप्रतिपदं।कूर्पदृशइतिकूर्पंशर्करारजोविद्यतेदृक्ष्वक्षिषुयेषांतेतथारजःपिहितदृष्टयःस्थूलदृष्टयइतियावत्।उदर
स्यहृदयापेक्षयास्थूलत्वात्।यद्वाकूर्पंसूक्ष्मंसूक्ष्मदृशइत्यर्थः।तदाहृदयस्थंसूक्ष्ममेवात्मस्पततत्प्रवेशायप्रथममुदरेस्थमुपासतइतिभावः।

उदरमुपासतेयऋषिवर्त्मसुकूर्पदृशःपरिसरपद्धतिंहृदयमारुणयोदहरम्॥ततउदगादनं
ततवधामशिरःपरमंपुनरिहयत्समेत्यनपतंतिकृतांतमुखे १८

आरुणयस्तुसाक्षात्तुहृदयस्थंदहरंसूक्ष्ममेवोपासतेहृदयविशेषणंपरिसरपद्धतिमितिपरितःसरंतिप्रसर्पंतीतिपरिसरानाड्यस्तासांपद्ध
तिंमार्गंप्रसरणस्थानमित्यर्थः।विशेषणस्यफलमाह।ततइति।ततोहृदयात्भोअनंततवधामउपलब्धिस्थानंसुषुम्णाख्यंपरमंश्रेष्ठंज्यो
तिर्मयंशिरःमूर्द्धानंप्रतिउदगात्।उदसर्पत्।मूलाधारादारभ्यहृदयमध्यात्ब्रह्मरंध्रंप्रत्युद्गतमित्यर्थः।कथंभूतंधामयत्समेत्यप्राप्यपुनरिह
कृतांतमुखेमृत्युमुखेसंसारेनपतंतीति।तथाचश्रुतिः।शतंचैकाचहृदयस्यनाड्यःतासांमूर्द्धानमभिनिःसृतैकातयोर्ध्वमायन्नमृतत्वमिति
विष्वङ्ङन्याउत्क्रमणेभवंतीति।उदरादिषुयःपुंसांचिंतितोमुनिवर्त्मभिः।हंतिमृत्युभयंदेवोहृद्गतंतमुपास्महे॥१८॥ ॥

२.५.
५

न्वीश्वरस्यापि तर्हि जीववत् उच्चरहृदया दिसंबंधेनैतदनुप्रविष्टस्य च तारतम्ये सति केन विशेषेणोपास्यत्वमिती मामा[illegible]परिहरंस्यः एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतांतरात्मा । कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च [illegible] यः स्वकं ततीत्याह स्वकृत विचित्रयोनिषु विशन्नित्स्वयं कृतासु उच्चनीचमध्यमासु योनिषु अभिव्यक्तिस्थाने कार्य्येषु देहादिषु हेतुतया उपादानतया प्रागेव विद्यमानत्वेन मुख्यप्रवेशासंभवाद्विशन्निव वर्त्तमानः स्तरतमतो न्यूनाधिकभावेन च कास्मिंश्चो भसे अवभाससे स्वकृतयोनीरनुकरोती ति स्वकृतानुकृतिः अनलवत् अग्निर्यथा स्वतस्तारतम्यहीनो पि काष्ठानुसारेण तथा तथा प्रकाशते तेन हुतं अथातो वितथासु मिथ्याभूतास्वमूषुयो

स्वकृतविचित्रयोनिषु विशन्निव हेतुतया तरतमतश्चकास्स्यनलवत्स्वकृतानुकृतिः । अथ वितथा
स्वमूषु वितथं तव धाम समं विरजधियोऽन्वयंत्यभिविपन्यव एकरसम् १९

न

तिषु अवितथं सत्यं यतः समम विशेषं अतः सत्यं तव धाम स्वरूपं विरजधियो विमलमतयः अन्वयंति जानंति । नु इति पृथक् पदं वा । अत्र हेतुः अभिविपन्यव इति अभितो विगतव्यवहाराः पनव्यवहार इत्यस्य रूपं पन्यु रिति । ऐहिकामुष्मिकफलरहिता इत्यर्थः । अविशेषत्वादेकरसं सन्मात्रं अतत्त्वोपाधिकृततारतम्याभावात् अप्रच्युतैश्वर्य्यस्योपास्यत्वमिति भावः । स्वनिर्मितेषु कार्य्येषु तारतम्यविवर्जितं । स राम
र्वानुस्यूतः सन्मात्रं भगवंतं भजामहे ॥ १९ ॥ ॥ श्रीगोपीजनवल्लभाय नमः ॥ ॥ ५

अपि च कुतोन्विय माध्यंकास्यात् भगवतो देहाद्युपाधिकृतदोषप्रसंग इति यतो अविद्याकामकर्मभिः संसरतो जीवस्यापि भगवद्भावं लक्षणया
बोधयंतस्तद्दोषं निषेधयंति। स यश्चायं पुरुषे यश्चासावादित्ये स एकः तत्त्वमसीत्याद्याः श्रुतयः। ननु कुतस्त्वर्थस्यात्मनः शक्तितिरियमीश्वरत्वे
न क्रियते न तु तस्येश्वरत्वं बोध्यते नैतद्युज्यते यतस्तत्र। यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ। तस्यैते कथिता ह्यर्थाः प्रकाशंते महात्मन इत्याद्याः
श्रुतयः कृतावतारस्य भगवतश्चरणभजनमुपायं वदंतीत्याह। स्वकृतपुरेष्विति। स्वकर्मोपार्जितेषु पुरेषु देहेषु अमीषु नरादिषु भोक्तृत्वेन व
र्तमानं पुरुषं अखिलशक्तिधृतः सर्वेशस्याश्रयस्य पूर्णस्य तवांशकृतं वदंति अंशाइवांशाः कृतउ वत्कृतः त्वद्रूपं वदंतीत्यर्थः। ननु कार्यकारण

स्वकृतपुरेष्वमीष्वबहिरंतरसंवरणं तव पुरुषं वदंत्यखिलशक्तिधृतोंशकृतम्। इति नृगतिं विविच्य
कवयो निगमावपनं भवत उपासतेंघ्रिमभवं भुवि विश्वसिताः ॥२०॥ ७॥ ॥

संघातस्य कुत एवंभूतत्वं तत्राह। अबहिरंतरसंवरणमिति बहिः कार्यमंतरं कारणं वस्तुतस्तदावरणशून्यं तयोरसत्त्वादित्यर्थः। इति एवं नृगति
र्जीवस्य गतिं तत्त्वं विविच्य विशोध्य कवयः अन्यथेदं न प्राप्यत इति ज्ञानंतः निगमावपनं निगमोक्तकर्मणां वैमो[illegible] मंताडुप्यंते ऽस्मि
[illegible]पावपनं क्षेत्रं सर्वकामार्पणविषयमित्यर्थः। यत्रार्पितानि कर्माणि मुक्तिफलं फलंतीति तं भवतोंघ्रिमभवं [illegible] निवर्तकं विश्वसिताः कृत
निश्चयाः सन्तः उपासते अर्चनवंदनादिभिः सेवंते भुवीति मर्त्यलोक इदमेवोचितमिति दर्शयति। त्वदं[illegible]शानत्वन्मायाकृतबंधनं। त्वदंघ्रि
सेवामादिश परानंदनिवर्तय ॥२०॥ ॥७॥

ह्रु०
६
6

भक्तिरन्यसाधनमितिवचनमनुचिंतनीयमन्वानो भक्तिं गुरूकरोति दुःखं गमेति। भो ईश्वर दुर्बोधं यदात्मतत्वं तस्य निगमाय ज्ञापनाय तवा
त्ततनोराविःकृतमूर्त्तेः चरितमहामृताब्धिपरिवर्त्तपरिश्रमणाः चरितमेव महामृताब्धिस्तस्मिन् परिवर्त्तो विगाहस्तेन परिश्रमणाः परिवि
र्ज नार्थः श्रमणं श्रमः गतश्रमा इत्यर्थः। अपवर्गमपि केचित् न परिलषंति नेच्छंति कुतोऽन्यत् इंद्रपदादि। केचिदिति। एवंभूता भक्तिरसिका
विरला इति दर्शयति। न केवलमन्यन्नेच्छंति किंतु ते तेन सुखेन पूर्णाः संतः पूर्वसिद्धं गृहादिसुखमप्युपेक्षंत इत्याह। तव चरणसरोजहंसकु

दुरवगमात्मतत्वनिगमाय तवात्ततनोश्चरितमहामृताब्धिपरिवर्त्तपरिश्रमणाः। न परिलषंति केचि
दपवर्गमपीश्वर ते चरणसरोजहंसकुलसंगविसृष्टगृहाः॥२१॥ ॥ठ॥ ॥ ॥

लसंगविसृष्टगृहा इति। तव चरणसरोजे हंसा इव रममाणा ये भक्तास्तेषां कुलं तेन संगस्तेन विसृष्टा गृहा यैस्ते तथा। अनेन श्रवणकीर्त्तने दर्शिते।
श्रुतिश्च मुक्तेरप्याधिक्यं भक्तेर्दर्शयति। यथाह। यं सर्वे देवा नमंति मुमुक्षवो ब्रह्मवादिनश्चेति व्याख्यातं च सर्वज्ञैर्भाष्यकृद्भिः। मुक्ता अपि ली राम
लया विग्रहं कृत्वा भजंत इति। त्वत्कथामृतपाथोधौ विहरंतो महामुदः। कुर्वंति कृतिनः केचिच्चतुर्वर्गं तृणोपमं॥२१॥ ॥ ६

आराममस्यपश्यंतिनतंपश्यतिकश्चनानतंविदाथयइमाजजानान्यद्युष्माकमंतरंबभूवानीहारेणप्रावृताजल्पाचासुतृपउक्थशासश्च
रंतीत्याद्याः श्रुतयः अनुक्तोपसंत्योजगदात्मनीश्वरेरतिमुपदिशंतीत्याह। त्वदनुपथमिति। त्वदनुवर्त्तित्वसेवोपयिकमिदंकुलायंकोली
यतइतिकुलायंशरीरं आत्मसुहृत्प्रियवत्। आत्माचसुहृच्चप्रियश्चतद्वत् चरतिस्वाधीनतयावर्त्ततइत्यर्थः। तथात्वयिउन्मुखेहितेप्रियेआ
त्मनिचअप्यर्थेचकारः। एवंभूतेषुसत्स्वपिवतअहोकष्टंनरमंतिनसख्यादिनाभजंति। अपितुअसदुपासनयादेहाद्युपलालनेनआत्महनः आत्मा
ऽतिंकुर्वतः यदनुशयाः यस्यामसदुपासनायांअनुशयोवासनायेषांतेकुत्सितशरीरभृतःसंतः उरुभयेसंसारेभ्रमंतिपरिवर्त्तंतेअतःआत्महन
इतिभावः। त्वय्यात्मनिजगन्नाथेमन्मनोरमतामिह। कदाममेदृशंजन्ममानुषंसंभविष्यति।।२२।। ८।। इदानीमात्मावाअरेद्रष्टव्यः श्रोतव्यो

त्वदनुपथंकुलायमिदमात्मसुहृत्प्रियवच्चरति तथोन्मुखेत्वयिहितेप्रियआत्मनिच। नवतरमंत्यहोऽसदुपासन
यात्महनोयदनुशयाभ्रमंत्युरुभयेकुशरीरभृतः।।२२।। ८।। निभृतमरुन्मनोक्षदृढयोगयुजोहृदियन्मुनयउपासते
तदरयोपिययुःस्मरणात्। स्त्रियउरगेंद्रभोगभुजदंडविषक्तधियोवयमपितेसमाःसमदृशोंघ्रिसरोजसुधाः २३।८

मंतव्योनिदिध्यासितव्यइत्याद्याःश्रुतयोध्यानमंगत्वेनोपदिशंतीत्याह। मनश्चअक्षाणींद्रियाणिचनिभृतानिसंयमितानियैः तेचतेदृढंयोग
युंजंतीतिदृढयोगयुजः तेतथाभूतामुनयोहृदियत्तत्वमुपासतेतदेवारयोपितवस्मरणाद्ययुः। स्त्रियोपिकामतः उरगेंद्रभोगभुजदंडविषक्त
धियः अहींद्रदेहसदृशयोर्भुजदंडयोर्विषक्ताधीर्यासांताः परिछिन्नदृष्टयः समदृशः सममपरिछिन्नंत्वांपश्यंत्योवयंश्रुतयोभिमानिन्योदेवता
अपितेसमानाएवतत्कृपाविषयतया अंघ्रिसरोजसुधाः अंघ्रिसरोजंसुष्ठुधारयंत्यः। अयंभावः। इत्थंभूतस्तवस्मरणानुभावः येयोगिनःस्वांहृ
द्यालंबनंउपासतेयाश्चवयंत्वांसमंपश्यामः याश्चस्त्रियःकामतःपरिछिन्नंध्यायंतियेचद्वेषेणसर्वानपितांस्त्वमेवप्रापयतीति। चरणस्मरणं

७

यतो वाचो निवर्त्तन्ते अप्राप्य मनसा सह । को ह्यद्धा वेद क इह प्रावोचत् कुत आजाता कुत इयं विसृष्टिः । अर्वाग्देवा अस्य विसर्जनेन तथा यो वेदस्यत
आवभूव यच्चनेजद्देकं मनसो जवीयो नैनद्देवा आप्नुवन् पूर्वमर्षत् । तद्धावतोऽन्यानत्येति तिष्ठत् तस्मिन्नपो मातरिश्वा दधातीत्याद्याः श्रुतयः
भगवन् त्वं दुर्ज्ञेयमेव दन्त्पो भक्तिमेवो रीकुर्वन्तीत्याह । क इह नु वेदेति वत अहो भगवन् इह जगति अयः सरं पूर्वसिद्धं त्वां अवरजन्मलयः अर्वा
चीनो त्पत्ति विनाशवान् कोऽनु पुमान् वेद जानाति । ईश्वरस्य पूर्वसिद्धत्वं स्य चार्वाचीनत्वे प्रमाणं वदन् ज्ञानकारणाभावमाह । यत उद
गादिति । यतः त्वत्तः ऋषिर्ब्रह्मा उत्पन्नः । यं ब्रह्माणमनु उभये आध्यात्मिकाधिदैविकां देवगणा उत्पन्नाः ततोऽप्यर्वाचीनाः सर्वे यदा तु भवा
न्सर्वमवष्टभ्य उपसंहृत्य शयीत तर्हि तदा अनुशायिनां जीवानां ज्ञानसाधनं नास्तिय । तः तदा न सत् स्थूलं आकाशादि न चासत् सूक्ष्मं महद

क इह नु वेद बताऽवरजन्मलयोऽग्रसरं यत उदगादृषिर्यमनु देवगणा उभये । तर्हि न सन्न चासदुभयं न च कालजवः
किमपि न तत्र शास्त्रमवकृष्य शयीत यदा ॥२४॥११॥ ॥छ॥ ॥

दादि । न च उभयं सदसद्रूपं मायाख्यं शरीरं न च कालजवः तन्निमित्तभूतं कालवैषम्यं एवं सति । तदा न किमपि [illegible]
त्वानां न तावत् भगवत् ज्ञानसामर्थ्यं । तथा च श्रुतिः ॥ नतं विदाथ य इमा जजानान्यद्युष्माकमन्तरं बभूवेत्याद्याः यदा तु प्रलयसमये न वक्तृत्व
मस्ति । तदापि साधनाभावान्न भगवत् ज्ञानं । अतस्त्वदेकशरणतया श्रवणकीर्त्तनादिभक्तिरेव सुकरेति । ब्रह्महं बुध्यादिसंरुद्धः क्व च भूमन्न राम ७
महस्तव । दीनवंधो दयासिंधो भक्तिं मे नृहरे दिश ॥२४॥१२॥ ॥

* इंद्रियप्राणादिभिः न च ज्ञापकं शास्त्रमपि अयमभिप्रायः ॥ = सर्वाद्धि स्वाद्धिगतानीदेहाद्युपाधिभि
र्ता तराया णां कालवशेन च मलिनस [illegible] ३ ३

इतोऽपि न ज्ञानं सुखकं उपदिशतामपि भ्रमवाक्यत्वादित्याह। जनिमसत इति। असतो जगतो जनिमुत्पत्तिं ये वैशेषिकादयो वदन्ति असत एव
ब्रह्मत्वस्योत्पत्तिं ये च पातंजलादयः। सत एवैकविंशतिप्रकारस्य दुःखस्य नाशं मोक्षं वदन्ति। ये नैयायिकाः उत अपि च ये सांख्यादय आत्म
नि भिदां भेदं ये च मीमांसकाः विपणं कर्मफलव्यवहारमृतं सत्यं स्मरन्ति वदन्ति। ते सर्वे आरूपितैरारोपितैर्धर्मैरेवोपदिशन्ति। न तत्त्वदृष्ट्या
सदेव सोम्येदमग्र आसीत्। ब्रह्मैव सन् ब्रह्माप्येति। अनीशया शोचति मुह्यमानः। अविद्यायामन्तरे वर्तमानाः स्वयं धीराः पण्डितंमन्यमानाः
दंद्रम्यमाणाः परियन्ति मूढाः। अन्धेनैव नीयमाना यथान्धाः। एकमेवाद्वितीयं ब्रह्म एकधावद्रष्ट्याचेवद्दृश्यत इत्यादिश्रुतिविरोधात्। किं

जनिमसतः सतो मृतिमुतात्मनि ये च भिदां विपणमृतं स्मरन्त्युपदिशन्ति त आरूपितैः। त्रिगुणमयः पुमानिति भिदा यदबोधकृता त्वयि न ततः परत्र स भवेदवबोधरसे ॥२५॥१२॥ ॥

च वक्ष्यतः पुरुष त्रिगुणमयत्वे सर्वमिदं संगच्छेत न तु तद्दृस्तीत्याह त्रिगुणमयः पुमानिति भिदा यदबोधकृता त्वयीति। त्रिगुणमयः पुमानित्यनेन देहे
न्द्रियाभिमान उपलक्षणमेतद्भिदादिः सा यस्मात् त्वयि विषये अबोधकृता त्वद्विषयाज्ञानविजृम्भिता तर्हि किमज्ञानमस्ति वस्तुतः पुंसि नेत्याह
ततः अबोधात् परत्र परे अस्संगे अवबोधरसे। ज्ञानघने सम्यग्बोधो न भवेत् न संभवतीत्यर्थः॥ मिथ्यातर्ककर्कशेरितमहावादान्धकारान्तर
भ्राम्यन्मन्दमतेरमन्दमहिमन्त्वत्ज्ञानवर्त्मास्फुटं। श्रीमन्माधव वामन त्रिनयन श्रीशंकर श्रीपते गोविन्देति मुदा वदन्मधुपते मुक्तः कदा स्यामहं॥२५।१२॥ ॥

दृ॰ उ॰ ८

ननुयद्यसन्नोत्पद्यतेपरिशिवत्रिगुणामयःपुरुषोनभवतितर्हिइदंप्रपंचजातंपुरुषश्चपृथक्भातीत्युक्तंस्यात्।कथंतर्हितयोःसत्वेनप्रतीतिरित्यत्राह।सद्विभमनइति।मनःमनोमात्रविलासितमिदंचित्त्रिगुणात्मकंप्रपंचजातमसदेवसद्विवविभातिकथमितिचेदत्राह।त्वयीति।त्वय्यधिष्ठाने।अधिष्ठानसत्तयासद्रूपत्वेनप्रतीयतइत्यर्थः।नकेवलमिदंकारास्पदंकिंत्वआमनुजात्मनुजःपुरुषः।अभिविधावाकारःपुरुषमभिव्याप्येति।पुरुषस्यापिपृथक्सत्वप्रतीतिर्मायामात्रविलसितेत्यर्थः।तथाचश्रुतिः।असतोधिमनोऽसृज्यतमनःप्रजापतिमसृजतप्रजापतिःप्रजाअसृजततद्वाइदंमनस्येवपरमंप्रतिष्ठितंयदिदंकिंचेति।नन्वात्मविदामपिविश्वंसदेवस्फुरतिअतःकथमसत्स्यादित्यत्राह।सदभि

सद्विभमनस्त्रिवृत्त्वयिविभात्यसदामनुजात्सदभिमृशंत्यशेषमिदमात्मतयात्मविदः।नहिविकृतिं
त्यजंतिकनकस्यतदात्मतयास्वकृतमनुप्रविष्टमिदमात्मतयावसितम्।।२६।। ।।१३।। ।। ।।

मृशंतीति।आत्मविदस्त्वशेषमिदंभोक्तृभोग्यात्मकंविश्वमात्मतयैवसदभिमृशंतिसदितिजानंति।आत्मकार्यत्वादात्मपृथगित्यर्थः।तथाहियदुपादानकंयत्कार्यंभवति।तत्तेनैवरूपेणप्रतीयतउपादीयतेचेतिलोकाचारेणदर्शयति।नहिविकृतिं[illegible]कनकस्यति[illegible]तंनिश्चितं।यतस्तवतःसदाभातिजगदेतदसत्स्वतः।सदाभासमसत्वांतस्मिन्भगवंतंभजामते।।२६।। ।।१३

नत्व(?)ज्ञानमनंतं ब्रह्म नेह नानास्ति किंचन मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यतीत्यादिश्रुतिभिरेवंभूतस्य भगवतः प्रतिपादनात् त
त्प्राप्तं सुकरमेवेति कृते भक्त्या अत आह। तव परि ये चरंतीति। तवेति कर्मणि षष्ठी त्वां ये परिचरंति छंदसि व्यवहिताश्चेति यच्छब्देन व्यवधानम
दोषः। केन रूपेण अखिलसत्वनिकेततया अखिलानि सत्वानि निकेतो यस्य स तथा तस्य भावस्तत्ता तया सर्वभूतावासतयेत्यर्थः। उत एव
अविगणय्य तिरस्कृत्य तत एव निर्ऋतेर्मृत्योः शिरः मूर्द्धानं पदापदेन आक्रामंति। मृत्योर्मूर्द्धि पदं दधति तरंति मुच्यंत इत्यर्थः। ये पुनर्विमुखा अ
भक्तास्तान् गिरा वाचा पशूनिव विबुधान् विदुषोपि परिवयसे बध्नासि। कृतः त्वयि कृतसौहृदाः कृतं सौहृदं प्रेम यैः ते खलु निश्चितं पुनंति पवि

तव परि ये चरंत्यखिलसत्वनिकेततया त उत पदाक्रमंत्यविगणय्य शिरो निर्ऋतेः। परिवयसे पशूनिव गिरा विबुधानपि तांस्त्वयि कृतसौहृदाः खलु पुनंति न ये विमुखाः ॥२७॥ १४॥ ॥

त्रयंति। आत्मानं अन्यानपि इति शेषः नेतरे। तथा च श्रुतिः। तस्य वाक्तंतिर्नामानि दामानि तस्येदं वाचा तंत्या नामभिर्दामभिः सर्वं सितमिति। अयम
भिप्रायः। स समेवंभूतमात्मानं श्रुतयः प्रतिपादयंति तत्र च यद्यपि वस्तुनोऽपरोक्षत्वादपरोक्षमेव ज्ञानमुत्पद्यते। तथाप्यसंभावना विपरीतभावना
तिरस्कृतत्वान्मलिनचित्तेषु परोक्षमिव भवतीति नापरोक्षं संसारभ्रमनिवृत्तिसमर्थं भगवत्परिचर्यया तु समग्रमलचित्तानां तत्प्रसादेन लब्धाप
रोक्षज्ञानानामयत्नत एव करकलितो मोक्ष इति। तथा च श्रुतयः। देहांते देवः परं ब्रह्म तारकं व्याचष्टे। यमेवैष वृणुते तेन लभ्यः। यस्य देवे परा भ
क्तिरित्याद्यः। तपंतु तापैः प्रपतंतु पर्वताग्रादटंतु तीर्थानि पठंतु चागमान्। यजंतु यागैर्विवदंतु योगैर्हरिं विना नैव मृतिं तरंति ॥२७॥१४॥ ॥

तं १

दृ. उ.
८

ननु यद्यपि खिलसत्वनिकेतत्वेन भगवतः सेव्यत्वमुच्यते तर्हि तत्तत्कारणसंबंधात्मकर्तृत्वभोक्तृत्वे चसर्वेषां त्वद्भक्तानां तथात्वमिति
चेत तर्हि जीवानामपि तत्तुल्यमिति केन विशेषेण पुनः सेव्यसेवकत्वमिति मीमांसां कांपरिहरंस्तः अपाणिपादो जवनो गृहीता एवं पत्य
चक्षुः स शृणोत्यकर्णः । स वेत्ति विश्वं न च तस्य वेत्ता तमाहुरग्र्यं पुरुषं पुराणमित्याद्याः श्रुतयः स्तुवंतीत्याह । त्वमकरण इति । करणसं
बंधरहित एवाखिलकारकशक्तिधरः अखिलानां प्राणिनां यानि कारकाणि इंद्रियाणि तेषां शक्तीर्धारयति प्रवर्तयतीति तथा कुतः स्वराट्
यतः स्वेनैव राजसे दीप्यसे न हि स्वतः सिद्धज्ञानशक्तेरिंद्रियापेक्षेत्यर्थः । अतस्तव बलिमुद्वहंतीति पूजां कुर्वंति अजया अविद्यया सहिता
स्तया हता इत्यर्थः । अनिमिषा देवा इंद्रादयः तत्सृज्या विश्वसृजो ब्रह्मादयोऽपि यथाशक्त्या एव किंकराः स्वामिनं सेवंते तथा विद्या युक्ताः

त्वमकरणः स्वराडखिलकारकशक्तिधरस्तव बलिमुद्वहंति समदंत्यजयानिमिषाः । वर्षभुजोऽखिलक्षितिपते
रिव विश्वसृजो विदधति यत्र ये त्वधिकृता भवतश्चकिताः ॥२८॥ ॥२५॥ ॥

देवादयस्त्वामिति लोकोक्तिः समदंति च मनुष्यैर्दत्तं हव्यकव्यादि जगद्धाणं बलिं भक्षयंतीति । अत्र दृष्टांतः वर्षभुजोऽखिलक्षितिपतेरिवेति । यथा
वर्षभुजः खंडमंडलपतयोऽखिलक्षितिपतेर्महामंडलेश्वरस्य स्व प्रजादत्तं बलिमुद्वहंति । तद्वदिति । कथं बलिमुद्वहंतीत्याह । विदधति यत्र ये त
धिकृता भवतश्चकिता इति । त्वत्तो भीताः संतो यस्मिन्कर्मणि ये नियुक्तास्ते तत्तत्कुर्वंतीति । त्वदाज्ञापालनमेव बलिमुद्वहनमित्यर्थः ॥ तथा च श्रु
तिः । भीषास्माद्वातः पवते भीषोदेति सूर्यः भीषास्मादग्निश्चेंद्रश्च मृत्युर्धावति पंचम इति । अनिंद्रियोऽपि यो देवः सर्वकारकशक्तिधृक् सर्वज्ञः

तदेवं करणप्रवर्त्तकमीश्वरं करणपरतंत्रा नरा भजंतीत्युक्तं न केवलमियदेव कारणं ततउत्पन्नत्वेनापि तत्परतंत्रत्वादिति वदंति। यथाग्नेः क्षुद्रा विस्फुलिंगा व्युच्चरंति। एवमेवास्मादात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि सर्व एत आत्मानो व्युच्चरंतीत्यादि श्रुतय इत्याह स्थिरचरजातय इति। हे विमुक्त नित्यमुक्त यदि त्वमजया मायया विहरः विहारक्रीडा भवति तदा स्थिरचरजातयः स्थिराश्चराश्च जातयः जात्या लिंगिता देहा येषां ते जीवाः स्युः भवेयुः कथंभूतस्य ततोऽजातः परस्य दूरे वर्त्तमानस्यासंगस्येत्यर्थः। कथं विहारः उदीक्षया ईक्षणलेशेन। ननु मयि लीनानां जीवानां कथं जन्मस्यात्तत्राह। उत्थनिमित्तयुज इति। ईक्षयैव उत्थितानि अविर्भूतानि

स्थिरचरजातयः स्युरजयोत्थनिमित्तयुजो विहर उदीक्षया यदि परस्य विमुक्त ततः। न हि परमस्य
कश्चिदपरो न परश्च भवेद्वियत इवापदस्य तव शून्यतुलां दधतः॥ २९॥ ॥१६॥ ॥ ॥

निमित्तानि कर्माणि तद्धेतूनि लिंगशरीराणि वा तैर्युज्यंत इति ते तथा। ननु किं तेभिन्नोत्थानेन मदिच्छयैव भवंतु। नत्वयि वैषम्याभावाद्विषमसृष्टेरयोगादित्याह। परमस्येति। तव परमस्य उत्तमस्य परमकारुणिकस्य वियत इवाकाशसदृशस्य समस्येत्यर्थः॥ कश्चिदपरः स्वीयः परोऽस्वीयश्च न भवेत् न संभवतीत्यर्थः। असद्वा इदमग्र आसीत्। ततो वै सदजायतेत्यादिश्रुत्या शून्यपूर्वकत्वमिव प्रतीयते तदर्थं पुनः विशिनष्टि। शून्यतुलां दधतः। शून्यसाम्यं भजतः तदेव दर्शयितुं पुनर्विशिनष्टि अपदस्येति। न पद्यत इत्यपदस्तस्य वाङ्मनसयोरगोचरस्येत्यर्थः। त्वदीक्षणवशात्क्षोभमायाबोधितकर्मभिः। जातान्संसरतः खिन्नान्न हरे पाहि नः पितः॥ २९॥ ॥१६॥ ॥

द. उ.
१०

एवं तावत्परमात्मनः सकाशादविद्याकृतकार्योपाधयः ... प्रजीवा जाताः संभवंतो भजंतीत्युक्तं तत्र यद्येका विद्या तदा जीवस्या
प्येकत्वादेकमुक्तौ सर्वमुक्तिप्रसं... ...नाना विद्यास्तर्हि तस्यैवांशांतरेण संसारानपगमात् इति निर्मोक्षत्वप्रसंगः ... इत्याशंक्य वलेन वक्त
...वेन तत्सारकं ... ...वस्थाः संभवंतीत्यादि
ष्ट ... ... तेषु किं ते भवंतः ... नियामित्वाच्चाणामपि न सहत इत्याह। अपरिमिता इति ...
तत्त्वा नंता ध्रुवास्तेन वरूपेण नित्याः सर्वगताश्चेत्तनुभृतो ... ...यदि स्युः तर्हि तेषां समत्वात्... ...स्यता नयते इति कृत्वा हे ध्रुव

अपरिमिता ध्रुवास्तनुभृतो यदि सर्वगतास्तर्हि न शास्यतेति नियमो ध्रु
व नेतरथा। अजनि च यन्मयं तदविमुच्य नियंतृ भवेत्सममनुजानतां य
दमतं मतदुष्टतया॥३०॥२७॥४॥ ॥

नियमो नियमनं तत्त्वयानस्यात् इतरथा तु घटेत। ...
... ...तयात्र परित्यज ...
तत्... नानात्वात्तः तत्र च तेषामणुत्वे देहव्यापिचैतन्यं न स्यात् देहपरिमाणत्वे च मध्यपरिमाणानां सावयवत्वेनानित्यत्वं स्यात् अ
सर्वगता नित्याश्चेति केचन मन्यंते। तत्र न तावदुक्तदोषप्रसंगः अविद्याभेदेन तच्छक्तिभेदेन वा बहुमुक्तव्यवस्थासंभवात्। ईश्वरस्य

ननु यदि च परमात्मनो जीवा जायन्त इति नियन्तृनियम्यभाव उच्यते तत् तथा सति जीवानामनित्यत्वप्रसंगेन प्रतिदिनं कृतनाशाकृताभ्यागमप्रसं
गः स्यात्। किं च तदा मोक्षो नाम जीवस्य स्वरूपहानिरेव स्यात्। न चैतद्युक्तं। स्वप्रकाशानन्दात्मनो ऽविद्याकृतानर्थनिवृत्तिमात्रस्य मोक्षत्वा
भ्युपगमादित्याशंक्योपाधिजन्मनैव जन्म जीवानामुच्यते। न स्वतो घटनादिवत्। न घटवदिति। तत्र किं प्रकृते जीवरूपेणोद्भवः स्यात्। पु
रुषस्य वा उभयोर्वा। आद्ये जीवानां जडत्वापत्तिः द्वितीये पुरुषस्य विकारित्वप्रसंगः। अत एव न तृतीय इत्याशयेनोक्तं प्रकृतिपुरुषयोरुद्भवो
न घटवत् इति श्रुत्या ऽजत्वश्रुतिपादनादपीत्याह। अजयोरिति। तथा च श्रुतिः। अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः जनयन्तीं सरूपां। अ

न घटवदुद्भवः प्रकृतिपूरुषयोरजयोरुभययुजा भवन्त्यसुभृतो जलबुद्बुदवत्॥

जो ह्येको जुषमाणो ऽनुशेते जहात्येनां भुक्तभोगामजो ऽन्य इति। उभययुजा तु भवन्ति उभयं च तत् युज्यत इति उभययुक् संबंधं पर
स्पराध्यासं तमिति यावत् तेन असुभृतः प्राणाद्युपाधयो जीवा जायन्त इत्यर्थः। जलबुद्बुदवदिति। यथा केवलेनानिलेन वा जलेन वा
जलबुद्बुदा न भवन्ति। किं तु मिलिताभ्यां तद्वत् यथा ऽनिलो निमित्तं जलमुपादानं। एवमत्रापि प्रकृतिर्निमित्तं पुरुष उपादानं। तस्मा
द्वा एतस्मादात्मन आकाशः संभूतः सो ऽकामयत बहु स्यां प्रजायेयेति। यथाग्नेः क्षुद्रा विस्फुलिंगा व्युच्चरन्त्येवमेवास्मादात्मनः सर्वे प्रा
णाः सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि सर्व एत आत्मानो व्युच्चरन्तीत्यादिश्रुतिषु चेतनाचेतनप्रपंचस्य परमात्मोपादानत्वश्रवणात्
न च विकारित्वं परिणामानंगीकारात् केचित्तु नः परिणाममंगीकृत्य आत्मनो विकारमिया विपरीतं निमित्तोपादानभावमिच्छन्ति। सर्वथा

द॰ उ॰
२१

तावद्व्यवच्छक्तिपुरुषैक्याद्भवंतीति सिद्धं। तदेवमेकमेवाद्वितीयं ब्रह्म अजामेकां च विनाशीवा अरेयमात्मेत्यादिश्रुतिबलात् उत्पत्तिश्रवणा
च्च जीवानामौपाधिकमेव जन्म न स्वतः इत्युक्तं उपाधिलयेन परमात्मनि पुनः श्रयश्रवणादपि न वास्तवं जन्मेत्याह। त्वयितइति। त्व
यि कारणात्मनि तत इमे जीवाः ततइति। यतो न वास्तवं जन्म तस्माद्धि विधनामगुणैरनेकप्रकारकार्योपाधिभिः सह लिल्युः लीना
बभूवुः तत्र सुषुप्तिप्रलययोर्मधुन्यशेषरसा इव लीयंते यथा मधुनि सकलकुसुमरसा विशेषतोऽनुपलक्ष्यमाणा अपि सामान्येन
पलक्ष्यंते। एवं स्वापादौ विशेषमात्रलयात्कारणात्मविद्यमानत्वात् सामान्यतो वर्तंते। मुक्तौ तु कारणस्यापि लयात्त्वयि परमे निरूपा

त्वयि त इमे ततो विविधनामगुणैः परमे सरित इवार्णवे मधुनि लिल्युरशेषरसाः।।२८।।३१।। ।।

धौ सरित इवार्णवे लीयंत इति विवेकः। तथा च श्रुतयः यथा सोम्य मधु मधुकृतो निस्तिष्ठंति नानात्ययानां वृक्षाणां रसान्समवहारमेक
तां रसं गमयंति ते यथा न विवेकं लभंते अमुष्याहं वृक्षस्य रसोऽस्म्यमुष्याहं वृक्षस्य रसोऽस्मीत्येवमेव खलु सोम्येमाः सर्वाः प्रजाः सति
संपद्य न विदुः सति संपद्यामह इति। यथा नद्यः स्यंदमानाः समुद्रेऽस्तं गच्छंति नामरूपे विहाय। तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुष
मुपैति दिव्यमित्याद्याः। यस्मिन्नुद्यद्विलयमपि यद्भाति विश्वं लयादौ जीवोपेतं गुरु करुणया केवलात्मावबोधे अत्यंतांतं व्रजति सह सा सिं
धुवत्सिंधुमध्ये चित्तं त्रिभुवनगुरुं भावये तं नृसिंहं।।३१।। २८।। ।।श्रीगोपीजनवल्लभायनमः।। ।।

मध्ये॰

एम
२१

एवं तावत्परमेश्वरात् जीवा जायंते गृहूशेन च कर्माणि कुर्वंति पुनस्तत्र लीयंत इति संसारचक्रभ्रमणमुक्तं। इदानीं तन्निवृत्तये परीत्य भूतानि
परीत्य लोकान् परीत्य सर्वाः प्रदिशो दिशश्च। उपस्थाय प्रथमजामृतस्यात्मनात्मानमभिसंविवेशेत्याद्याम्नायवदत्र हन्निं विदधतीत्याह।
नृषु तवेति। नृषु जीवेषु अमीषु तव मायया भ्रममुक्तलक्षणं अवगत्य ज्ञात्वा सुधियः भृशं त्वयि अभवे भवनिवर्त्तके भावं स्वभावमनुहृ
न्निं दधति कुर्वंति। अनुप्रभवं अन्वनुप्रभवो यस्मिन् नूतं प्रमं। ततः किमत आह। कथमिति। अनुवर्ततां अनुवर्त्तमानानां त्वामेवं शरणं भज

नृषु तव मायया भ्रमममीष्ववगत्य भृशं त्वयि सुधियोऽभवे दधति भावमनुप्रभवम्। कथमनुवर्ततां भव
भयं तव यद्भ्रुकुटिः सृजति मुहुस्त्रिनेमिरभवच्छरणेषु भयम्॥ ३३॥ २९॥ ॥

तां भवभयं संसारभयं कथं भवेत् न कथंचिदपीत्यर्थः। कुतः। यद्यस्मात्तव भ्रुकुटिः अभंगरूपा त्रिनेमिः त्रिस्रो नेमयः इवावच्छेदाः शीतोष्ण
वर्षकाला यस्य संवत्सरात्मकस्य कालस्य सः अभवच्छरणेषु न भवाच्छरणं रहिता ये तेषां तेष्वेव भयं जन्ममरणादिलक्षणं सृजति करोति।
अत एवंभूतं संसारमाकलय्य तन्निवृत्तये सुधियस्त्वयि भावं दधतीति। संसारचक्रक्रकचैर्विदीर्णमुदीर्णनानाभवतापतप्तं। कथंचि
दायन्नमिह प्रपन्नं त्वामुद्धर श्रीनृहरे न लोकम्॥ ३३॥ २९॥ ॥

द॰ उ॰
१२

सचभगवति [illegible] नियमे सति भवति सोऽपि गुरूपसदनादिति [illegible] पसदनं विदधाति। हि ज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः
श्रोत्रियं ब्रह्मनिष्ठं आचार्यवान् पुरुषो वेद। नैषा तर्केण मतिरापनेया [illegible] कान्येन सुज्ञानाय प्रेष्ठेत्याद्याः श्रुतयः इत्याह विजितहृषी
कवायुभिरिति। विजिता निहृषीकाणीन्द्रियाणि वायुश्च प्राणो यैः तैरपि अदान्तमनस्तुरंगं अदान्तं अदमितं मन एव तुरंगः। दुर्दम
त्वसाम्यात् तं ये यन्तुं नियन्तुं यतन्ति प्रयतन्ते अतिलोलमतिचंचलं। गुरोश्चरणं समवहाय अनाश्रित्य ते उपायेषु खिद्यन्ते। क्लिश्यन्तीत्य

विजितहृषीकवायुभिरदान्तमनस्तुरगं य इह यतन्ति यन्तुमतिलोलमुपायखिदः॥ ॥ ॥ ॥
व्यसनशतान्विताः समवहाय गुरोश्चरणं वणिज इवाज सन्त्यकृतकर्णधरा जलधौ॥३७॥ २०॥

[illegible]पायखिदः सन्तो व्यसनशतान्विताः। बहुव्यसनाकुला इह संसारसमुद्रे संतितिष्ठन्ति दुःखमेव प्राप्नुवन्तीत्यर्थः। हे अज अकृतकर्णध
रा अस्वीकृतना[illegible]विकाः वणिजो यथा [illegible] उक्तं च। नृदेहमाद्यं सुलभं सुदुर्लभं प्लवं सुकल्पं गुरुकर्णधारं। मयानुकूलेन नभस्वतेरितं
पुमान् भवाब्धिं न तरेत् स आत्महा। प्राकृतैः संस्कृतैश्चैव गद्यपद्याक्षरैस्तथा। देशभाषादिभिः शिष्यं बोधयेत् स गुरुः स्मृतः। गुरु[illegible]
[illegible] सुखानुभूतौ स्वतश्च मनो निश्चलं भवति नान्यथेति भावः। यदा परानन्दगुरो भवत्पदे पदं मनो मे भगवन्नभेत। तदा निरस्ता
[illegible]खिलसाधनश्रमः श्रयेय सौख्यं भवतः कृपातः॥३७॥२०॥ ॥ द॰म
१२

परीक्ष्य लोकान्कर्मचितान्ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन। तथा। यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः। अथ मर्त्योऽमृतो भ
वत्यत्र ब्रह्म समश्नुत इत्याद्या वैराग्यपरां गां विभ्रतीत्याह। स्वजन सुतेति। आत्मा देहः धाम गृहं असुः प्राणाः स्वजनादिभिः किं सर्वरसे सर्वे र
साः सुखानि विद्यन्ते यस्मिंस्तु त्वयि परमानंदे। एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवन्तीति श्रुतेः। यतः त्वां सेवमानस्य पुंसः आत्म
नि सति नृणां तुच्छैरेतैः किं कउपयोग इति सत् सत्यं परमार्थसुखमजानतां अत एव मिथुनतः स्त्रियाः मिथुनीभूय रतये मायासुखाय

स्वजनसुतात्मदारधनधामधरासुरथैस्त्वयि सति किं नृणां श्रयत आत्मनि सर्वरसे। इति सदजान
तां मिथुनतो रतये चरतां सुखयति को न्विह स्वविहते स्वनिरस्तभगे ॥३४॥ २१॥

चरतां प्रवर्त्तमानानां कर्मणि एषणीयो। अजानतश्चरतः पुरुषान् को नु अर्थः सुखयति आनंदयति न कोपीत्यर्थः। इह संसारे कथंभूते स्वनि
हते स्वत एव नश्वरे स्वनिरस्तभगे स्वत एव गतसारे पाठान्तरे कोन्वितस्यैतद्विशेषणद्वयं अतस्त्वद्भजनमेवोचितमित्यर्थः। भजतो हि भग
वत्साक्षात्परमानंदचिद्घनः आत्मैव किमतः कृत्यं तुच्छदारसुतादिभिः॥३४॥ २१॥ ॥

द. उ.
१३

13

एवं गुरूपदेशेन तत्त्वमवगम्य सारासारविवेकेन च सर्वं त्यागं निर्विघ्नतयैव महत्संगोपपत्तिमिः सम्यगवधारयितुं तीर्थसदनानि तु नयः पर्यंतीति मंतव्य इत्याशिक्षत्यर्थमाह। भुवि पुरुपुण्यपतीर्थसदनानीति। तेऽनलक्षणा ऋषयो विमदा निरहंकाराः यतो भवतः पदांबुजं हृदियेषां ते अतः स्वयमेव अघभिदंघ्रिजलाः। अघभिदंघ्रिजलं येषां ते। उत अपि तथाविधा अपि गुरूणि बहूनि तीर्थानि सदनानि क्षेत्राणि तान्येवोपासते सेवंते प्रायस्तत्रैव महत्संगो भवतीति अथवा पुरुत्र विकं भगवद्भजनलक्षणं पुण्यं येषां तानि च तानि तीर्थानि च गुरवः महांत इत्यर्थः। तेषां सदनानि आश्रमाः। यथाहामरसिंहः। निपानागमयोस्तीर्थमृषिजुष्टजले गुराविति। न च

भुवि पुरुपुण्यतीर्थसदनान्यृषयो विमदास्त उत भवत्पदांबुजहृदोऽघभिदंघ्रिजलाः। दधति सकृन्मनस्त्वयि य आत्मनि नित्यसुखे न पुनरुपासते पुरुषसारहरावसथान्॥ ३५॥ २१॥ ॥

न च पुरुषसारहरावसथानुपासते पुरुषाणां सारं विवेकस्थैर्यधैर्यक्षमाशांतिप्रमुखं हरंतीति तथा ते च ते आवसथा गृहाः तान्। नन्वतिरोहित्वात् कथं तेषां गृहत्यागः इत्यत आह। दधति। सकृन्मनस्त्वयि य आत्मनि नित्यसुखे इति सकृदपि त्वयि मनो दधति तेषां गृहत्यागः किं पुनरेवंभूता इत्यर्थः॥ मुंचन्नंगतदंगसंगमनिशं त्वामेव संचिंतयन् संतः संतियतो यतो गतमदास्तानाश्रमानावसन्। नित्यं तन्मुखपंकजाद्विगलितत्वत्पुण्यगाथामृतस्रोतः संप्लवसंप्लुतो नरहरे न स्यामहं देहभृत्॥ १॥ २२॥ राम
१३

नन्वाम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां । तदन्तानां क्रियार्थेन समन्वय इति तत्र तत्रैव जैमिनिना वेदस्य क्रियापरत्वाभिधानादुपनिषदामपि
तद्वेव युक्तं । तथोक्तं तंत्रवार्त्तिककृता । एतेन क्रत्वर्थकर्तृप्रतिपादनेनोपनिषदां नैराकांक्ष्यं व्याख्यानमिति । न । एकमेवाद्वितीयं ब्रह्म विज्ञानमानंदं
अवस्तु रस्थोऽमित्येवं तद्विपरीतानामप्रतिपादनात् । न तत्र द्वितीयपरमानंदरूपस्य कर्मांगत्वं युज्यते । अननुमतं चैतद्वार्त्तिककृतः । सर्वं वेदबहिः
ज्ञानं संस्कारत्वेन गम्यते । परांगं चात्मविज्ञानादन्यत्रेत्येव धार्यतामिति तेनैवोक्तत्वात् । एतदर्थमेव मननायमुनयः पर्यंतो सूत्रं । तत्र तावत्तद्वैत
स्य सत्यत्वे भवेदप्येवं तदेव तु न संभवतीति निश्चयाय मननं । मननेन तत्त्वावधारणप्रकारमाह । सत्तद्रूपमुपस्थितं सदिति चेदिति । इदं विश्वं धर्मि सदिति
साध्यो धर्मः सत्त्वमुत्पन्नत्वात् हेतुः यद्यदुत्पन्नं तत्तदात्मकमेव दृष्टं यथा कनकादुत्पन्नं कुंडलादि तदात्मकं तद्वदिति । तत्र यदि सद्भेदः साध्य

सत्तद्रूपमुपस्थितं सदिति चेन्ननु तर्कहतं व्यभिचरति क्वच क्वच मृषा न तथोभययुक् । यत्र हन्तये विकल्पा इति तोय परंपरया भ्रमयति भारती
ते तदाऽपादानत्वनिर्देशेनैव भेदप्रतीतेर्विरुद्धो हेतुरित्याह । ननु तर्कहतमिति । ननु नामेदं सा ⌊तद्रूपत्वं तिमिरुक्षपजउग्नः ॥३६॥२३॥
धयामः । किं तु तदुत्पन्नत्वेन कुंडलादिवद्भेदं प्रतिषेधयामः । तथाभेद एव स्यादिति चेदित्याशंक्यानैकांतिकत्वेन दूषयति । व्यभिचरति क्वचेति । चि
त्सुत्रादिषु मुद्गरघटप्रध्वंसादिषु च तथादर्शनादिति भावः । ननु तदुत्पन्नत्वं नाम तदुपादानत्वं तच्च भिन्नत्वं यतो नानैकांतिकत्वमित्याशंक्य दूष
यति । क्वच मृषेति । गुणोपादानस्यापि फणिनो न गुणत्वं किं तु मिथ्यात्वं अन्यथा कुंडलादिवद्बाधप्रसंगात् । अतः पुनरनैकांतिकत्वमेवेति भावः । ननु
तत्र न केवलं गुणमात्रं फणिन उपादानं किं त्वविद्यायुक्तं तथाभूतस्यावस्तुत्वात् तत्फणिनो मिथ्यात्वमित्याशंक्य तत्तुल्यमत्रापीति दूषयति । न त
थोभययुगिति । अयमर्थः अत्राप्यविद्यायुक्तस्यैव सत उपादानत्वं एवंभूतस्य चानवस्तुसत्त्वं अतः सदुपादानत्वमसिद्धमिति न वस्तुसत्त्वं प्र
पंचस्येति । ननु माभूदनेन हेतुना प्रपंचस्य सत्यत्वं हेत्वन्तरेण तु साधयामः । तथा हि । सदिदं अर्थक्रियाकारित्वात् नयदेवं न तदेवं यथा शुक्तिरजत

द्द. उ. सितिरित्याह। व्यवहारे विकल्पाऽभि [illegible] शक्ति व्यव [illegible] र्थे क्रियार्थे विकल्पो भ्रम उचित [illegible] कार्य [illegible] दिनाऽपिक्ष चित्त्यव हा-
२४ र्शिनाता। नन्वेवं प्रथातो स्पष्टारोपो भ्रमः इ सिद्धः। अत्र संतानस्यैव यद्वपंचो भ्रमः स्यात्। सत्यैवानो है [illegible] स [illegible] महं [illegible] स्य
[illegible] भ्रम [illegible] नस्त्व नि। यज्ञातगुणसत्ताकम ध्यारोपितवानवेति। नेत्याह अ्थपरंपरयेति। अ्थ [illegible] यो विकल्प इत्यर्थः
[illegible] एवं स्कारजन्यो भ्रमः संस्कार सिद्धये पूर्वं प्रतीतिमात्रमपेक्षते न वस्तुसत्त्वं। प्रतीतो सत्यां वस्तुसत्त्वाभावेन भ्रमव्यतिरेकादर्श-
नात् भ्रमो ऽनादित्वात् पूर्वपूर्वभ्रमहेतुस्य परा [illegible] परंपरान्यायेन [illegible] च व्यवहारः से [illegible] योजको हेतुरिति।
नन्वहं यं हवेरात्व [illegible] जिनः सुकृतं भवति। अ्प्राम [illegible] मूर्त्या [illegible] भिः कर्मफलस्यानित्यत्वं प्रतिपाद [illegible] सत्वं न घटते नहि
[illegible] वस्तु भ्रमङ्गवति। तस्माद्वेद प्रतिपा [illegible] त्वात हेतं स देवेत्याशंक्याह [illegible] यती ति हे भगवन् ते तव भारती विदग्ध [illegible] इति भिर्वक्ष्ये
[illegible] [illegible] भिः [illegible] अह्लाभराक्रांतमंदमतीन् भ्रमयति मोहयति अ्यं भावः। नहि वेदः कर्म्मफलं नित्यत्व मभिधेति किं त्व
[illegible] स्य मात्रं विध्येकवाक्यत्वात्। अ्न्यथा [illegible] भेदप्रसंगात्। न [illegible] कर्मजितो लोकः क्षीयते। एवमेवामुत्र पुण्यजितो लोकः क्षी-
यत इति न्यायोपबृंहित [illegible] विरोधाद् अ्तः कर्मजडानामिदं भ्रममात्रमिति। एतेनैव तस्माद्वा [illegible] आत्मन [illegible] संभूत इत्यादीना
[illegible] रत्वं दर्शितं भवति। उद्गतं भवतः [illegible] स्वज [illegible] कुर्वत् कार्य्य [illegible] [illegible] इदंतं तव सत्य रम
[illegible] मिति [illegible] २६ ॥२॥ ॥श्रीगोपालनन्दनाय नमः॥ ॥ ॥ ॥ २४

तदेवंप्रपंचस्यसत्त्वेसाधकंनास्तीत्युक्तं इदानीमसत्त्वेसृष्टिप्रलयश्रुतयःयतोवाइमानिभूतानिजायंत इत्याद्याः तन्मूलंचानुमानंप्रमाणमि
त्याह। नयदिदमिति। यत्तद्यस्मादिदंविश्वंसृष्टेःअग्रेपूर्वंनआसआसीत।सदेवसोम्येदमग्रआसीत। आत्मावाइदमेकएवाग्रआसीदित्या
दिश्रुतेः नचनिधनात्प्रलयात्अनुअनंतरंभविष्यत्भविष्यतिनासदासीन्नोसदासीत्तदानीमित्यादिश्रुतेः अतःकारणादत्रांतरामध्येपि
एकरसेकेवलेत्वयिमृषामिथ्यारूपमेवविभातीतिनिर्निश्चितं यतएवंअतःश्रुत्यादिविणाजातिविकल्पपथेबुद्धिगतानांइंद्रियमात्राणां
गृह्योहंकारीयसरूपाणांविकल्पानेदाघरक्तंउत्पादय।। तेषांपंथानोमार्गाःप्रकाराः तेरूपमीयंतेसदृशतयानिरूप्यतेयथा तत्रका

नयदिदमग्रआसन्नभविष्यदतोनिधनादनुमितमंतरात्वयिविभातिमृषैकरसे।अतउपमीयतेद्रविणजातिविकल्प
पथैर्वितथमनोविलासमृतमित्यवयंत्यबुधाः॥३७॥२४॥ ॥

र्थकारणनामधेयमात्रत्वात्कारणसदृशीवस्तुसत्यं[illegible]दीनांनामभावित्वात्ब्रह्मैववसत्यं। तथाचश्रुतिः।।यथासोम्यैकेनमृत्पिंडे
नविज्ञातेनसर्वंमृन्मयंविज्ञातंभवति। वाचारंभणंविकारोनामधेयंमृत्तिकेत्येवसत्यं। तद्यथा एकेनलोहमणिनासर्वंलोहमयंविज्ञातंस्यात
[illegible]रकेननखनिकृंतनेनसर्वंकार्ष्णायसमित्यादितस्मादस्यसत्वेप्रमाणाभावादसत्वेप्रमाणस्यविद्यमानत्वात्। वितथंमनोविलासंजग
तंसत्यमितियेऽवयंतिजानंतितेऽबुधाःअज्ञाइत्यर्थः। अत्रैवंप्रयोगः। विवादाध्यासितंनसत्प्राह्यं तयोरविद्यमानत्वात्। विकारित्वाद्दृश्य
त्वाद्राह्यक्रिरजतादिवत्। आत्मवच्चेति। मुकुरकुंडलकंकणकिंकिणीपरिणतंकनकंपरमार्थतः।महदहंकृतिखमुखंतथानरहरेर्व
पुःपरमार्थतः॥३८॥२५॥

ननुच यदि रूपं चोनाम नास्त्येव न्वासत्ता तेन चेतन्यस्य संबंधगं घोपित हि किमराहं जीवेनयतः अयं संसरति किं वा बद्ध पुरुषः श्रीश्वरस्य य
तो नित्यमुक्तः किं विषयं च तदा कर्मकांडमित्यपेक्षायां जीवेश्वरविशेषं। द्वासुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते। तयोरन्य
पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति। अजामेकां लोहितशुक्लकृष्णां मित्याद्याव दंती त्याह। सयदजयेति। सतुजीवः यत यस्मा
दजयामायया अजां अविद्यां अनुशयीत आलिंगेत् ततः गुणांश्च देहेंद्रियादीन् स्वेवमानआत्मतयाध्यस्यन् तदनु तदनंतरं स
रूपतां तद्धर्मयोगं च जुषन् अपेतभगः पिहितानंदादिगुणः सन् मृत्युं संसारं भजति प्राप्नोति तद्विषयमेव च कर्मकांडमिति भावः॥ त्व

सयदजया त्वजामनुशयीत गुणांश्च जुषन् भजति सरूपतां तदनु मृत्युमपेतभगः॥ त्वमुत जहासि तामहिरिवत्व
चमात्तभगो महसि महीयसेऽष्टगुणितेऽपरिमेयभगः॥३८॥२५॥

मुतत्वं तु जहासि तामजां मायां ननु सा मध्ये वास्ति कथं तस्या गत्त्राह। अहिरिवत्वचमिति। अयं भावः यथा भुजंगः स्वगतमपि कंचुकं गुण
बुध्या नाभिमन्यते। तथा त्वमजां। न हि निरंतरानंदादिसंवित्कामघेनं वृंदपतेरजयाक्रुसमितितामुपेक्ष्य इति। कुत एतदाह। आत्तभगः नित्य
मैश्वर्यः महसि परमैश्वर्ये अष्टगुणिते अणिमाद्यष्टविभूतिमति महीयसे पूज्यसे विराजसे। कथंभूतः। अपरिमेयभगः अपरिमितैश्वर्य
र्यः न त्वन्येषामिव देशकालादिपरिच्छिन्नं तवाष्टगुणितमैश्वर्यं अपि तु परिपूर्णानंदरूपानुवर्धित्वादपरिमितमित्यर्थः। नन्वतीतवदी
णां गणागतानां कालस्वभावादिभिर्भगवान् स्ववरजस्तमोगुणमयान् तन्मीलयंती वहन् मामाक स्यप[illegible]दिरस्य शिवरं संमर्दयं त्वातरे माया

एवं तावदुक्तसाधनकदंबेन ये भगवंतं भजंति ते मृत्युं तरंति इतरे संसरंतीत्युक्तं । उदासीना ये बहिःसंगं परित्यज्य भगवन्मार्गे प्रवृत्ता अपि कथंचिदं
तर्वासनाशिनः कामान्न मुंचंति तेन भगवंतं प्राप्नुवंति न चेह सुखं लभंते केवलं कुयोनीरेव प्राप्नुवंतीति तान् शोचन् । कामानूपः कामयते
मन्यमानः स्वकर्मभिर्जायते तत्र तत्रेत्यादिश्रुत्यर्थमाह । यदि न समुद्धरंतीति हे भगवन् ये यतयः हृदि स्थिताः कामजटाः कामस्य जटाः प्र
लानि वासनाः । यदि न समुद्धरंति नोत्सारयंति तेषामसतां भवान् हृदि गतोऽपि दुरधिगमः दुःप्रापः । कथं अस्मृतकंठमणिः विस्मृतकंठम
णिस्तत्तुल्यः स यथा कंठे वर्तमानोऽप्यस्मृतश्चेदप्राप्तवद्भवति तद्वदिति । न केवलमेतावत् किं त्वसुतृपयोगिनामिंद्रियतर्पणपराणां योगा

यदि न समुद्धरंति यतयो हृदि कामजटा दुरधिगमोऽसतां हृदि गतोऽस्मृतकंठमणिः । असुतृपयोगिनामुभय
तोऽप्यसुखं भगवन्ननपगतांतकादनधिरूढपदाद्भवतः ॥३९॥ ॥२६॥

द्यमनां उभयतोऽप्यसुखं इहामुत्र च दुःखमेव तदाह अनपगतांतकात् अनिवृत्तात् मृत्योः लोकाराधनधनार्जनादिक्लेशात् भोगवैभवशाक्ट्य
भयाच्चेह तावत् दुःखं भवत ईश्वरादपि दुःखं कथंभूतात् अनधिरूढपदात् अनधिरूढं पदं स्वरूपं यस्य तस्मात् त्वत्स्वरूपप्राप्त्यभावाद्वि
द्यावद्विषयत्वेन प्राप्तनिजधर्मातिक्रमणनिबंधनत्वाद्दंडरूपनरकप्राप्तेरमुत्राप्यसुखमित्यर्थः । दंभन्यासमिषेण वंचितजनं भोगैकचिंतातुरं सं
मुह्यंतमहर्निशं विरचितोद्योगक्लमैराकुलं । आज्ञालंघिनमज्ञमज्ञजनतासंमाननासन्मदं दीनानाथ दयानिधान परमानंद प्रभो पाहि मां ।
॥३९॥२६

द॰ उ॰
१६

नन्वयतेर्न्न किमपि कृत्यमस्ति प्रारब्धमेव सुखोपभोगेनोपक्षिप्यति अतः किमिति हृद्ययाराध्यते भयतोप्यसुखमिति श्रूयते च एष नित्यो महि-
मा ब्राह्मणस्य न कर्म्मणा वर्द्धते नो कनीयानित्यादि तत्राह । त्वदवगमीति । हे सगुण षड्गुणैश्वर्य्ययुक्त त्वदवगमी त्वत्तज्ज्ञानवान् भवदुत्थ-
शुभाशुभयोर्भवतः कर्मफलप्रदातुरीश्वरात् हेतोः उत्थयोराविर्भूतयोः शुभाशुभयोः प्राचीनपुण्यापुण्यकर्म्मणोः फलभूतान् गुणवि-
गुणान्वयान् सुखदुःखसंबंधान् न वेत्ति नानुसंधत्ते तर्हि तदानीं च देहभृतां देहाभिमानिनां प्रवृत्तिनिवृत्तिकरीर्गिरः विधिनिषेधवच-
नानि न वेत्ति विगतदेहाभिमानत्वात् कार्य्यबोधाभावात् निःस्पृहत इत्यर्थः । युक्तं चैतत् यतः कारणात् मनुजैः अन्वहं श्रवणभृतः अनुदि-

त्वदवगमी न वेत्ति भवदुत्थशुभाशुभयोर्गुणविगुणान्वयांस्तर्हि देहभृतां च गिरः । अनुयुगमन्वहं सगुण
गीतपरंपरया श्रवणभृतो यतस्त्वमपवर्गगतिर्मनुजैः ॥४०॥ ॥२७॥

नं श्रवणेन चेतसि धृतस्त्वं तेषामपवर्गगतिः अपवर्गरूपा गतिः संवासिकथं श्रवणभृतः अनुयुगं ...गीतपरंपरा उपदेशसंततिः
तया स्वसंप्रदायानुसारेणेत्यर्थः । एतदुक्तं भवति ये तावत्तत्त्वज्ञानिनः न तेषां कर्माधिकारशंका विये चानवरतं त्वत्कथाश्रवणादि-
निष्ठास्तेषामप्यासन्नभवत्पदानां न विधिनिषेधः इतरेषां तु योगाद्यनेन्द्रियलालसानामुभयतोप्यसुखमिति । ...गमनं तव मे-
दिशमाधवस्फुरति यन्न सुखासुखसंगमः । श्रवणदर्शनभावमथापि यानहि भवान्निरथाविधिकिंकरः ॥४०॥२७॥ ॥ ॥ एम
१६

त्वद्वगमीनवेत्ति सुखदुःखेनच विधिनिषेधावित्युक्तं तत्र ननु कथमवगंतुं शक्यं दुरवगमस्यो कत्वादित्येवमाशंक्य तस्य मेदमनवगाह्य
हि मनोवाङ्मनसागोचरत्वादविषयत्वेनैव ज्ञानमिति दर्शयन्नयद्दीर्गागि दिवौ यद्वा कुपृथिव्यां यदंतरा द्यावा पृथिवी इमे
व्यूतं भवद्गमविष्यच्चेत्यादिश्रुतिप्रतिपादितमपरिमितं महिमानमाह । द्युपतय एवेति । हे भगवन् ते अंतं द्युपतयः स्वर्गादिलोकपतयो
ब्रह्मादयोपि न ययुः न प्रापुः तत्कुतः । यदनंतवद्यत्तत्तत्किमेपि त्वं न भवसि । आस्तां द्युपतयो [illegible] नय
युरिति । यत्यस्मात्त्वमपि आत्मनोऽन्तं न यासि । कुतस्तर्हि सर्वज्ञता सर्वशक्तिता वा । अत आह अनंततया अंताभावेन न हि शशविषा
णाज्ञानं सार्वज्ञं तद्वा सिर्वाधशक्तिर्वा शक्तिवैभवं विहंति । अनंतत्वमेवाह । यदंतरेति । यस्य तवांतरा मध्येननु अहोसावरणाः उत्त
रोत्तरं दशगुणा सप्तावरणयुक्ता अंडानि यान्यसंख्यानि समूहाः वांति परिभ्रमंति वयसा कालचक्रेण खेरजांसी व । सह एकदेव न तु पर्या
द्युपतय एवते न ययुरंतमनंततया त्वमपि यदंतरांडनिचया ननु सावरणाः । खइवरजांसि वांति वयसा सह यच्छुतयस्त्व
यि हि फलंत्यतन्निरसनेन भवन्निधनाः ॥ ४२ ॥ २८ ॥ येया । हियस्मादेवं अतः श्रुतयस्त्वयि फलंति तात्पर्यवृत्त्या पर्यवस्यंति न
तु साक्षाद्वदंति अयमेतावानिति सगुणस्य गुणानंत्यात् निर्गुणस्यागोचरत्वात् । कथं तर्हि पदार्थे तात्पर्यमिति । तत्र विधिमुखवाक्य
म वेद्यं नियमः पदार्थस्यैव वाक्यार्थत्वमिति । निषेधमुखे तु नायं नियम इत्याह । अतन्निरसनेनेति । अन्यदेव तद्विदितादथो अविदि
ताद् अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात् कृताकृतात् । अस्थूलमनणु इत्यादि प्रकारेण लक्षणया तत्त्वमसीत्यादयः पर्यवस्यंति ।
न च वाच्यं निषेधे शून्यमेव ज्ञाप्यत इति । यतो भवन्नि [redacted] धनाः भवति त्वयि निधनं समाप्तिर्या
सां तास्तथा । न हि निरवधिन्निषेधः संभवति । अतोऽवधिभूते त्वयि फलंतीत्यर्थः । द्युपतयो विदुरंतमनंततते न च भवान्गिरः श्रुतिमौ

५° ॥४२॥ इत्यशेषसमाम्नायपुराणोपनिषद्रस इति सर्वश्रुतिपुराणरहस्यतात्पर्यमित्यर्थः॥४३॥ ब्रह्मदायादेति। ब्रह्मैव दायमिव प्राप्य
१७ [illegible]प्यं अत्ति सेवत इति तथा। ब्रह्मपुत्रेति वा॥४४॥ पूर्णः श्रुतधरः श्रुतमर्थं मनसि धारयन्। वीरव्रतः नैष्ठिकः॥४५॥

श्रीभगवानुवाच॥ ॥इत्येतद्ब्रह्मणः पुत्रा आश्राव्यात्मानुशासनम्। सनन्दनमथानर्चुः सिद्धा ज्ञात्वात्मनो गतिम्॥४२॥
इत्यशेषसमाम्नायपुराणोपनिषद्रसः। समुद्धृतः पूर्वजातैर्व्योमयानैर्महात्मभिः॥४३॥ त्वं चैतद्ब्रह्मदायाद श्रद्धया
त्मानुशासनम्। धारयंश्चर गां कामं कामानां भर्जनं नृणाम्॥४४॥ ॥श्रीशुक उवाच॥ ॥एवं स ऋषिणादिष्टं गृही
त्वा श्रद्धयात्मवान्। पूर्णः श्रुतधरो राजन्नाह वीरव्रतो मुनिः॥४५॥ ॥श्रीनारद उवाच॥ ॥नमस्तस्मै भगवते कृष्णाया
मलकीर्तये। यो धत्ते सर्वभूतानामभवायोशतीः कलाः॥४६॥ इत्याद्यमृषिमानम्य तच्छिष्यांश्च महात्मनः। ततोऽगादाश्र
मं साक्षात्पितुर्द्वैपायनस्य मे॥४७॥ सभाजितो भगवता कृतासनपरिग्रहः। तस्मै तद्वर्णयामास नारायणमुखाच्छ्रु
तम्॥४८॥ इत्येतद्वर्णितं राजन्यन्नः प्रश्नः कृतस्त्वया। यथा ब्रह्मण्यनिर्देश्ये निर्गुणेऽपि मनश्चरेत्॥४९॥ ॥

नमस्त इति। कृष्णावतारतया नारायणं नमस्यति। अन्ये हि ग्रन्थे वांशकलाः पुंसः कृष्णस्तु भगवान्स्वयमिति॥४६॥ साक्षात्पितुरिति। योनिज ए भ
वधानं विना जनन[illegible]अग्निमथन[illegible] विदुरणौ रेतःपतितं मम मंथ्यमान[illegible]वतत उत्पन्नः शुक इति वदंति॥४७॥ १७

९.
१८
इडा.

समस्तवेदसूक्तपदार्थसंगृह्यानुस्मरयतियोस्योत्प्रेक्षक इति । यः अस्य विश्वस्य उत्प्रेक्षकः एवमिदमनुशासितेति
यो । सृष्टिस्थितिप्रलयादीन् प्रापयति । यमित्यालोचकोर्थः । अनेनेमिश्रित्वमुक्तं । ननु प्रकृतिपुरुषयोरुपादाननिमित्तत्वप्रसि
द्धिः सत्यं । तयोरपितत्त्वे स्थितत्वान्मूलकारणं स एवेत्याह योव्यक्तजीवेश्वर इति । प्रवेशनियमनेदर्शयति । यः इति पूर्वोक्तप्रकारेणो
४९ एवमालोच्यादिमध्यनिधनेष्वारिजेन्मम मध्यपालननिधनेष्वेतेषु कर्मसु योवर्त्तते । अनेनोपादानत्वमुक्तं ॥ ४९ इदंपुरुषार्थ
मेत सृष्टं तेनत्र ऋषिणासहैः कार्यं अहमितिदर्शनात् इतिजीवः तेन सहानुप्रविष्टः पुरः शरीराणितस्यभोगायतनानिचक्रे । ताः पुराः शा
स्तितस्य भोगं दत्त्वा परिपालयति । उपासकस्य च कैवल्यरूपो भवतीत्याह । यं संपद्येति यं संपद्य प्राप्यानुशयी अनुदेवत्
योस्योत्प्रेक्षक आदिमध्यनिधने योव्यक्तजीवेश्वरो यः सृष्ट्वेदमनुप्रविश्य ऋषिणा चक्रे पुरः शास्ति ताः । यं संपद्य
जहात्यजामनुशयी सुप्तः कुलायं यथा तं कैवल्यनिरस्तयोनिमभयं ध्यायेदजस्रं हरिम् ॥ ५० ॥ इति श्रीभागवते म
हापुराणे दशमस्कन्धे नारायणनारदसंवादे सप्ताशीतितमोऽध्यायः ॥ ॥
रणमूले शेत इति तथा स जीवः अजां कार्यकारणलक्षणाम विद्यां त्यजति न तु ब्रह्म संपन्नस्यापि जीवत्वस्य ... संबंधो दृश्यते अतआ
ह सुप्तः कुलायं यथेति । अयं भावः । यथा सुप्तः शरीरं त्यक्त्वा ... तिसत् तथा ... जीवन्मुक्तस्यापि ... वं तं पर्व
न् । कैवल्यनिरस्तयोनिं ... मूलकारणं मायायेन ... सर्वश्रुति शिरो रत्ननीरा
जितपदाब्जं भोगयोगप्रदं जनं ... इति श्रीभागवते दशमस्कन्धे टीकायां सप्ताशीतितमोऽध्यायः ॥ ॥ ॥ ॥ राम १८

पत्र १८